Kaveryashtakam Sahyakanyakashtakam

# कावेर्याष्टकम् अथवा सह्यकन्यकाष्टकम्

## Document Information

Text title : kAveryaShTakam 3 sahyakanyakAShTakam

File name : kAveryaShTakam3.itx

Category : aShTaka, devii, nadI, devI

Location : doc_devii

Author : Krishnapremi Anna

Transliterated by : Musiri Janakiraman

Proofread by : Musiri Janakiraman

Description-comments : Kaveri Stuti Series No. 532 Thanjavur Sarasvati Mahal Series

Latest update : July 13, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 13, 2024

*sanskritdocuments.org*

# कावेर्याष्टकम् अथवा सह्यकन्यकाष्टकम्

सरोज-सम्भवाच्युत-त्रिनेत्र-भावनामयीं
कवेर-राज-कन्यकां च कामितार्थ-दायिनीम् ।
अगस्त्य-कुण्डिकान्तर-प्रविष्ट-वारिरूपिणीं
भजामि सह्यकन्यकां भजामि सह्यकन्यकाम् ॥ १॥

पवित्र-धात्रि-वृक्षरूप-विष्णुपाद-सङ्गमां
पतत्रिरूप-धारि-विघ्नराज-चुञ्चु-चुम्बिताम् ।
भवाब्धि-तारकात्रिसूनु-पादुका-पवित्रितां
भजामि सह्यकन्यकां भजामि सह्यकन्यकाम् ॥ २॥

अनेक-कोटि-पुण्य-तीर्थ-सङ्गमेन पूरितां
अनोकह-प्रकीर्ण-पुष्प-पल्लवैः परिष्कृताम् ।
निनाद-पूर्ण-चारु-वीचि-कीर्ण-रत्न-मौक्तिकां
भजामि सह्यकन्यकां भजामि सह्यकन्यकाम् ॥ ३॥

तटद्वयेपि शम्भु-विष्णु-मन्दिरै-र्विराजितां
तटिल्लता-समान-देवसुन्दरीभि-राश्रिताम् ।
वटादि-वृक्ष-मूलवासि-मौनि-वृन्द-भावितां
भजामि सह्यकन्यकां भजामि सह्यकन्यकाम् ॥ ४॥

तरङ्ग-चारु-मेखलां विलोल-मीन-लोचनां
प्रवाळ-मौक्तिकोज्ज्वलां प्रफुल्ल-पुष्प-मालिकाम् ।
कुचायिताब्ज-कुड्मलां च कुङ्कुमादि-पाटलां
भजामि सह्यकन्यकां भजामि सह्यकन्यकाम् ॥ ५॥

भुजङ्ग-शायि-रङ्गनाथ-पाद-सेवनाशया
भुज-द्वयं प्रसार्य निःसृतामिव स्थितां मुदा ।
गजेन्द्र-केळि-वर्धिनीं द्विजेन्द्र-हर्ष-दायिनीं
भजामि सह्यकन्यकां भजामि सह्यकन्यकाम् ॥ ६॥

किरीटि-राम-शन्तनु-प्रभृत्यनेक-पार्थिवैः
प्रपूजितां च धर्मवर्म-राज-दाल्भ्य-कीर्तिताम् ।
धरातलैक-भूषणां सुरादि-सर्व-जीवनां
भजामि सह्यकन्यकां भजामि सह्यकन्यकाम् ॥ ७॥

प्रनष्ट-पञ्च-पातकां प्रकृष्ट-पुण्य-दायिकां
सहर्ष-दिव्य-केळिकां समुद्र-राज-नायिकाम् ।
सहस्र-पत्र-मालिकां सरोज-पत्र-दोळिकां
भजामि सह्यकन्यकां भजामि सह्यकन्यकाम् ॥ ८॥

सह्यकन्याष्टकमिदं पुण्यं प्रेमिकेन प्रकीर्तितम् ।
श्रद्धया कीर्तयन्नित्यं सर्वमङ्गळमाप्नुयात् ॥ ९॥

इति कावेर्याष्टकं अथवा सह्यकन्यकाष्टकं सम्पूर्णम् ।

Encoded by Musiri Janakiraman
Proofread by Musiri Janakiraman, Rajani Arjun Shankar

*Kaveryashtakam Sahyakanyakashtakam*
pdf was typeset on July 13, 2024

Please send corrections to *sanskrit@cheerful.com*